दिनाङ्कः-26.07.2024 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- केन्द्रीय-आयव्यय-प्रपूरक-संकल्पपत्रस्य उपरि चर्चा सदनद्वये अभवत्।
- प्रधानमंत्री नरेन्द्रमोदी अद्य द्रासक्षेत्रे कारगिल विजय दिवसस्य पञ्चविंशे उपलक्ष्यावसरे कारगिलयुद्धस्य नायकेभ्यः श्रद्धांजलिं अर्पितवान्।
- असम राज्यस्य मोइदम-समूहेन सांस्कृतिक श्रेण्यां त्रिचत्वारिंशत्तमः प्रतिष्ठितः यूनेस्को विश्वनिधिस्थलस्य मान्यता प्राप्ता।
- श्रीलङ्कादेशस्य दाम्बुल्लानगरे प्रथमे उपान्तिम-चक्रीय-क्रीडायां बाङ्गलादेशं दशक्रीडकानाम् अवशिष्टावेव पराजभूय भारतीय-महिला-क्रिकेटदलं एशिया-कपाख्यस्य स्पर्धायाः अन्तिमचक्रं प्राविशत्।
- अस्य वर्षस्य पेरिस् ओलम्पिक इति क्रीडाकुम्भः आधिकारिकतया अद्यारभते।

लोकसभा – आय/व्यय

केन्द्रीय आयव्यय प्रपूरक संकल्पपत्रस्य उपरि जायमानायां चर्चायां प्रतिभाग्यं ग्रह्णन् भाजपेतिदलस्य जुगलकिशोर: उक्तवान् यत् संकल्पपत्रमिदं व्ययायकत्वेन महत्वधायकं तु भवत्येव सामाजिक-दृष्ट्यापि महत्वपूर्णमस्तीति अस्यां चर्चायां पञ्चायती-राजमन्त्री राजीवरंजनसिंहोऽपि भागम् अभजत्। येन श्रीनरेन्द्रमोदिन: नेतृत्वधायिना प्रशासनेन उत्तमरीत्या कार्याचरणं क्रियते इति उक्तम्। अवसरेऽस्मिन् कंगना रनौतादय: नूतना: सांसदा: अपि प्रातिभाग्यं अकुर्वन्।

पीएम - कारगिल विजय दिवस:

प्रधानमंत्री नरेन्द्रमोदी अद्य द्रासक्षेत्रे कारगिल-विजय-दिवसस्य पञ्चविंशे उपलक्ष्यावसरे कारगिलयुद्धस्य नायकेभ्यः श्रद्धांजलिं अर्पितवान्। तत्रैकां सभाञ्च सम्बोधयन् प्रधानमन्त्री मोदी उक्तवान् यत् कार्गिलविजयदिवसः अस्मान् वदति यत् राष्ट्रस्य कृते कृताः त्यागाः अमर्त्याः भवन्तीति। जम्मू-कश्मीरे अद्यतन-आतङ्कवादि-आक्रमणानां विषये पाकिस्तानस्य आलोचनां कुर्वन् प्रधानमन्त्री अवदत् यत् पाकिस्तानः आतङ्कवादस्य, छद्म-युद्धस्य च साहाय्येन स्वं प्रासंगिकं स्थापयितुं प्रयतते। सः अग्रे अवदत् यत् भारतीयसैनिकाः आतङ्कवादं पूर्णबलेन मर्दयिष्यन्ति, शत्रुभ्यः उचितं उत्तरं दीयते इति। अस्मिन् भ्रमणकाले प्रधानमन्त्री लद्दाखनगरे शिङ्कुनलागुहामार्गपरियोजनायाः

प्रथमविस्फोटमपि करोति। शिङ्कुनलागुहामार्गपरियोजनायाम् दशम्लवैकोत्तर-चतुः कि.मी.दीर्घा ट्विन-ट्यूब् इति गुहामार्गपरियोजना अस्ति, यस्याः निर्माणं निमु - पदुम् दर्चामार्गे प्रायः अष्टशतोत्तरपञ्चदशसहस्र (१५,८००) फिटिति परिमितम् ऊर्ध्वतायां भविष्यति यया लेह्-नगराय प्रात्यर्त्विकसंपर्कः प्रदास्यते।

प्रधानमन्त्रिणा रक्षाक्षेत्रे कृतपरिष्काराणां चर्चा कुर्वता रक्षोत्पादने कृतवृद्धेः प्रशंसा कृता। तेन अग्निवीरादि योजनामभिलक्ष्य यूनां दिग्भ्रमीकरणाय विपक्षस्य निन्दाऽपि कृता। अवसरेऽस्मिन् लद्दाखस्योपराज्यपाल: डॉ० बी०डी० शर्मा केन्द्रीयरक्षा राज्यमन्त्री संजयसेठ: सर्वसैन्यप्रमुख: जनरल अनिल-चौहान: त्रयाणामपि सेनाप्रमुखानाञ्च उपस्थिति: आसीत्। अद्य विजय-दिवसावसरे राष्ट्रपतिना, रक्षामन्त्रिणा, सूचना-प्रसारण-मन्त्रिणा, सेनाप्रमुखै: अन्यै: नेतृभिश्च वीरबलिदातृ-भटेभ्य: श्रद्धासुमनानि समर्पितानि। अश्विनी वैष्णवेन च उक्तं यत् प्रधानमन्त्रिण: नरेन्द्रमोदिन: नेतृत्वे देश: रक्षोत्पादनादिक रक्षाक्षेत्रेषु आत्मनिर्भरतां समधिगच्छतीति।

मोइडम् - यूनेस्को :

असम राज्यस्य मोइदम-समूहेन सांस्कृतिक श्रेण्यां त्रिचत्वारिंशत्तमः प्रतिष्ठितः यूनेस्को विश्वनिधिस्थलस्य मान्यता प्राप्ता। प्रायः सप्तशतं वर्षाणि यावत् पुरातनं मोइदम् इष्टकानां, पाषाणानां च रिक्त-कक्ष्याः सन्ति, येषु राज्ञां, राजपरिवाराणां च अवशेषाः सन्ति। मोइदम् इत्यस्य समावेशस्य निर्णयः सर्वसम्मत्या नव दिल्ल्यां आयोजितेन विश्वनिधिसमित्याः सत्रेण कृतः।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम:: आकाशवाण्याः अन्तर्जालपटले www.newsonair.com इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

राज्यसभा- अनुमोदिताः

त्रिनवत्युत्तरत्रिशतोपग्रह-दूरदर्शन-प्रवाहिकाः अपलिङ्क्-डाउनलिङ्क् इति करणाय नीति-मार्गदर्शिकायाः अन्तर्गतं सूचना-प्रसारण-मन्त्रालयेन अनुमताः सन्ति। एताः नैज्याः उपग्रह-वार्ता-

प्रवाहिकाः सन्ति। राज्यसभायां एकस्य प्रश्नस्योत्तरे सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् एकविंशत्युत्तरद्विसहस्रतमस्य(२०२१) सूचनाप्रौद्योगिकीनियमस्य अष्टादश नियमान्तर्गतं सप्तत्रिंशदधिकाः आंकिकीयवार्ताप्रकाशकाः सूचनां दत्तवन्तः आसनिति।

लोकसभा – रूस भारत

रूसीसशस्त्रसेनासु नियुक्तानां केषाञ्चन भारतीयराष्ट्रियनागरिकाणाम् शीघ्रनिर्गमनमुद्दिश्य सर्वकारेण सन्त्यनुरोधाः प्राप्ताः, विदेशमन्त्रालयेन मास्कोनगरीय-भारतीय-दूतावासेन च सम्बन्धितरूसदेशीयैः प्राधिकारिभिः सह सर्वेषां अनुरोधानाम् निस्तारणाय दृढतया सम्बोधनं कृतम् अस्ति। कश्चित्कालपूर्वमेव अस्मिन् मासे रूसदेशस्य भ्रमणकाले प्रधानमन्त्रिणा नरेन्द्रमोदी सर्वेषां भारतीयानां नागरिकानां रूसीसशस्त्रसेनाभ्यः शीघ्रमुक्तये तत्कालीनावश्यकतामभिलक्ष्य दृढतया भारतीयपक्षं स्थापितमासीत्। लोकसभायां उत्तरकाले विदेशमन्त्रालयस्य राज्यमन्त्री कीर्तिवर्धनसिंहः अवदत् यत्, अद्यपर्यन्तं प्रायः १० भारतीयाः नागरिकाः रूसीसशस्त्रसेनां त्यक्तवन्तः इति।:

विदेशमन्त्री/आसियान्

विदेशमन्त्रिणा डॉ० जयशंकरेण उक्तं यत् आसियानेन सह राजनीतिक-आर्थिक-सुरक्षासहयोगाश्च सर्वोच्च प्राथमिकतायां सन्ति। अद्य वियनतियाने इति स्थाने आसियान-भारत विदेश-मंत्रिणामुपवेशनस्य उद्घाटन-सत्रं सम्बोधयन् श्रीजयशंकरस्य प्रोदीरितवान् यत् आसियान-भारतयो: प्राक्पूर्वीयनीति: हिन्दप्रशान्तमहासागरयो: दृष्टिकोणश्च प्राथमिक आधारशिला अस्तीति।

<u>आई बी एम</u>

गुजरात-महाराष्ट्र-कोंकण-गोवासु अजस्रं वृष्टिकारणात् जनजीवनं कुप्रभावितं वर्तते। भारतीय-ऋतुविज्ञान-विभागेन उक्तमस्ति यत् कोंकण-गोवा-मध्यमहाराष्ट्रस्य च कतिपय भागेषु तीव्रवर्षाया: संभावना अस्तीति। विभागेन इदमपि उक्तमस्ति यत् सौराष्ट्र-कच्छ-विदर्भ-मराठवाड़ा-इत्यादिषु क्षेत्रेष्वपि उत्कटवर्षाया: सम्भावना वर्तते। मध्यप्रदेशे वर्षाः भविष्यन्ति। महाराष्ट्रे तीव्रवर्षया पुणे-नगरस्य जनपद-नागर मार्गा: प्रभाविता: सन्ति। मुम्बई नगरस्य कतिपयभागेषु जलसंचयत्वात् यातायातव्यवस्था प्रभाविताऽस्ति, उपनगरीयरेल सेवाऽपि विलम्बेन प्रचलन्त्यस्ति। गुजरातराज्ये सूरत नवसारी वलसाड अथ दमनदादरा-नगरहवेलीत्यत्र च मूसलधारावर्षाया: सम्भावनत्वात् काषायी संचेतना अस्ति निस्सारिता।

## महिला एशियाकपः

श्रीलङ्कादेशस्य दाम्बुल्लानगरे प्रथमे उपान्तिम-चक्रीय-क्रीडायां बाङ्गलादेशं दशक्रीडकानाम् अवशिष्टावेव पराजयित्वा-भारतीय-महिला-क्रिकेटदलं एशिया-कपाख्यस्य स्पर्धायाः अन्तिमचक्रं प्राविशत्। रक्षकविजेतृदलं भारतं चतुर्पञ्चाशत् कन्दुकानामवशेषैव एकाशीतिः धावनाङ्कानाल्लक्ष्यं अनुसृत्य स्वस्य वर्चस्वं निर्वाहितवत्। रेणुकासिंहस्य राधायादवस्य च नेतृत्वे भारतीयकन्दुकप्रक्षेपिकाः सुनिश्चितं कृतवत्यः यत् धावनाङ्करचयित्र्यः निश्चिन्ततया धावनाङ्कानां योजने शक्षमाः मा भवन्त्विति। येन बाङ्गलादेशः स्वस्य आवंटितेषु विंशतिः कन्दुकप्रक्षेपणचक्रेषु अष्टक्रीडिकानां हानौ अशीतिरेव धावनाङ्काः योजितवत्यः। तस्योत्तरे भारतीये उद्घाटनक्रीडके स्मृतिमान्धना, शफाली वर्मा च सारल्ल्येनैव एकादशकन्दुकप्रक्षेपणचक्रैव त्र्यशीतिः धावनाङ्काः विनैव हानौ रचितवत्यौ। मन्धना ३९ कन्दुकेषु ५५ धावनाङ्कान्, शफाली वर्मा २८ कन्दुकेषु २६ धावनाङ्कान् कृतवती।

## पेरिस् ओलम्पिकः

अस्य वर्षस्य पेरिस् ओलम्पिक इति क्रीडाकुम्भः आधिकारिकतया अद्यारभते। सायंकाले सेन् नद्याः समीपे उद्घाटनसमारोहः भवति। अस्मिन् वर्षे, ओलम्पिकक्रीडाकुम्भस्य शतवार्षिकोत्सवः भवति । ततः पूर्वं भारतेन ह्यः एव पेरिस-ओलम्पिक इति क्रीडाकुम्भाभियानस्य आरम्भः साफल्येन कृतः, यत्र पुरुषदलेन तृतीयस्थानं प्राप्तम्, महिलादलेन च क्रमाङ्कन-परिक्रमे एव चतुर्थं स्थानं प्राप्य प्रागुपान्तचक्रे प्रविष्टिः प्राप्ता। अपि च भारतं श्वः शूटिंग्-इति दश मीटर् एयर-राइफल-इति स्पर्धायां मिश्रित-दलेन सह १० मीटर् एयर-पिस्टल्-पुरुष-महिला-स्पर्धाभिश्च पदकान्वेषणं करिष्यति|

।। इति वार्ता: ।।